एकादश समुद्दिष्टा दोषाः साङ्कर्य्यसंज्ञिताः ॥
समीपे चाप्यवस्थानात् पापं संक्रमते नृणाम् ।
तस्मात् सर्व्वप्रयत्नेन साङ्कर्य्यं परिवर्ज्जयेत् ॥”
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
“आलापाद्गात्रसंस्पर्शात् संवासात् सहभोजनात् ।
आसनाच्छयनाद्यानात् पापं संक्रमते नृणाम् ॥
आसनादेकशय्याया भोजनात् पंक्तिसङ्करात् ।
ततः संक्रमते पापं घटाद्घट इवोदकम् ॥”
इति गारुडे नीतिसारे ११२ अध्यायः ॥
राष्ट्रादिकृतपापेन राजादीनां परस्परं पापित्वं यथा,—
“राजा राष्ट्रकृतात् पापात् पापी भवति वै हरे ! ।
तथैव राज्ञः पापेन तद्राज्यस्थास्तु ये जनाः ॥
वर्णाश्रमादयः सर्व्वे पापिनो नात्र संशयः ।
भार्य्याहोदुष्कृती स्वामी वृजिनात् स्वामिनोऽबला ॥
तथा देशिकपापात्तु शिष्यः स्यात् पातकी सदा ।
शिष्याद्धि पापिनो नित्यं गुरुर्भवति दुष्कृती ॥
पातकी यजमानः स्यात् पापिनोऽङ्ग ! पुरोधसः ।
पुरोहितस्तथा पापी यजमानाद्दसो ध्रुवम् ॥”
अदत्तपुण्यपापभागित्वं यथा,—
“अदत्तानि च पुण्यानि पापानि च यथा प्रिये ! ।
प्राप्याणि कर्म्मणा येन तद्यथावन्निशामय ॥
देशग्रामकुलानि स्युर्भागभाञ्जि कृतादिषु ।
कलौ तु केवलं कर्त्ता फलभुक् पुण्यपापयोः ॥
अकृतेऽपि च संसर्गे व्यवस्थेयमुदाहृता ।
संसर्गात् पुण्यपापानि यथा यान्ति निबोध तत् ॥
एकत्र मैथुनाद्यानादेकपात्रस्थभोजनात् ।
फलार्द्धं प्राप्नुयान्मर्त्त्यो यथावत् पुण्यपापयोः ॥
स्पर्शनाद्भाषणाद्वापि परस्य स्तवनादपि ।
दशांशं पुण्यपापानां नित्यं प्राप्नोति मानवः ॥
दर्शनश्रवणाभ्याञ्च मनोध्यानात्तथैव च ।
परस्य पुण्यपापानां शतांशं प्राप्नुयान्नरः ॥
परस्य निन्दापैशुन्यं धिक्कारञ्च करोति यः ।
तत्कृतं पातकं प्राप्य स्वपुण्यं प्रददाति सः ॥
कुर्व्वतः पुण्यकर्म्माणि सेवां यः कुरुते परः ।
पत्नी भृत्योऽथ शिष्यो वा सजातीयोऽपि मानवः ।
तस्य सेवानुरूपेण तस्य तत्पुण्यभाग्भवेत् ॥
एकपंक्तिस्थितो यस्तु लङ्घयन् परिवेशयेत् ।
तस्य पापशतांशन्तु लभते परिवेशकः ॥
स्नानसन्ध्यादिकं कुर्व्वन् संस्पृशेद्वा प्रभाषते ।
स पुण्यकर्म्मषष्ठांशं दद्यात्तस्मै सुनिश्चितम् ॥
धर्म्मोद्देशेन यो द्रव्यं परं याचयते नरः ।
तत् पुण्यं कर्म्मजं तस्य धनं दत्त्वाप्नुयात् फलम् ॥
अपहृत्य परद्रव्यं पुण्यकर्म्म करोति यः ।
कर्म्मकृत् पापभोक्तात्र धनिनस्तद्भवेत् फलम् ॥
नापनुद्य ऋणं यस्तु परस्य म्रियते नरः ।
धनी तत् पुण्यमाप्नोति स्वधनस्यानुरूपतः ॥
बुद्धिदस्त्वनुमन्ता च यश्चोपकरणप्रदः ।
बलकृच्चापि षष्ठांशं प्राप्नुयात् पुण्यपापयोः ॥
प्रजाभ्यः पुण्यपापानां राजा षष्ठांशमुद्धरेत् ।
शिष्याद्गुरुः स्त्रिया भर्त्ता पिता पुत्रात्तथैव च ।
स्वपतेरपि पुण्यस्य भार्य्यार्द्धं समवाप्नुयात् ॥
परहस्तेन दानादि कुर्व्वतः पुण्यकर्म्मणः ।
विना भृतकशिष्याभ्यां कर्त्ता षष्ठांशमाहरेत् ।
आत्मनो वा परस्यापि यदि सेवां न कारयेत् ॥
श्रीकृष्ण उवाच ।
इत्थं ह्यदत्तान्यपि पुण्यपापा-
न्यायान्ति नित्यं परसंश्रितानि ।
शृणुष्व चास्मिन्नितिहासमग्र्यं
पुराभवं पुण्यमतिप्रियञ्च ॥”
इति पाद्मोत्तरखण्डे । ७१।१५७ अध्यायः ॥
क्षुद्रजन्तुप्रभृतीनां वधे पापं तत्प्रायश्चित्तञ्च यथा,—
“वधे च क्षुद्रजन्तूनां हिंसकानाञ्च पण्डितः ।
कार्षापणं समुत्सृज्य मृत्युकाले प्रमुच्यते ॥
अहिंसकानां क्षुद्राणां वधे शतगुणं ध्रुवम् ।
प्रायश्चित्तं मृत्युकाले कथितं पद्मयोनिना ॥
वधे विशिष्टजन्तूनां पश्वादीनाञ्च कामतः ।
ततः शतगुणं पापं निश्चितं मनुरब्रवीत् ॥
नराणां म्लेच्छजातीनां वधे शतगुणं ततः ॥
म्लेच्छानाञ्च शतानाञ्च यत् पापं लभते वधे ।
सच्छूद्रैकस्य च वधे तत् पापं लभते पुमान् ॥
सच्छूद्राणां शतानाञ्च यत् पापं लभते वधे ।
तत् पापं लभते नूनं गोवधेनैव निश्चितम् ॥
गवां दशगुणं पापं ब्राह्मणस्य वधे भवेत् ।
विप्रहत्यासमं पापं स्त्रीवधे लभते नरः ॥” * ॥
पापिदर्शनजन्यपापं यथा,—
“पापं यद्दर्शने तात ! कथयामि निशामय ।
दुःस्वप्नं पापबीजञ्च केवलं विघ्नकारणम् ॥
गोघ्नञ्च ब्रह्मघ्नं वापि कृतघ्नं कुटिलं तथा ।
देवघ्नं पितृमातृघ्नं पापं विश्वासघातिनम् ॥
मिथ्यासाक्ष्यप्रदातारं पश्चातिथ्यविवञ्चकम् ।
ग्रामयाजिनमेवेति देवविप्रस्वहारिणम् ॥
अश्वत्थघातिनं दुष्टं शिवविष्णुविनिन्दकम् ।
अदीक्षितमनाचारं सन्ध्याहीनं द्विजन्तथा ॥
देवलं वृषवाहञ्च शूद्राणां सूपकारकम् ।
शवदाही च शूद्राणां शूद्रश्राद्धान्नभोजिनम् ॥
अवीरां छिन्ननासाञ्च देवब्राह्मणनिन्दकम् ।
पतिभक्तिविहीनाञ्च विष्णुभक्तिविहीनकम् ॥
शूद्राणां विप्रवाञ्चैव चण्डालं व्यभिचारिणीम् ।
शश्वत् कोपयुतं दुष्टन्दग्धञ्च जारजम् ॥
चौरं मिथ्यावादिनञ्च शरणागतघातिनम् ।
मांसापहारिणञ्चैव ब्राह्मणं वृषलीपतिम् ॥
ब्राह्मणीगामिनं शूद्रं द्विजं वार्द्धुषिकन्तथा ।
अगम्यागामिनं दुष्टं चतुर्व्वर्णं नराधमम् ॥
मातासपत्नी माता च श्वश्रूश्च भगिनी सुता ।
गुरुपत्नी पुत्रपत्नी सोदरस्य प्रिया सती ॥
मातृष्वसा पितृष्वसा भागिनेयप्रिया तथा ।
मातुलानी नवोढ़ा च पितृव्यस्त्री रजस्वला ॥
पितृमातृप्रसूश्चैव चागम्याष्टादश स्मृताः ।
कीर्त्तिताः सामवेदे च परिपाल्याः सतां व्रज ! ॥
एतान् दृष्ट्वा च स्पृष्ट्वा च ब्रह्महत्यां लभेन्नरः ।
तस्माद्देवादिमान् दृष्ट्वा सूर्य्यं दृष्ट्वा हरिं स्मरेत् ॥
कामतो यदि पश्यन्ति तत्तुल्यास्ते भवन्ति वै ।
तस्मात् सन्तो न पश्यन्ति पापभीता व्रजेश्वर ! ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७।७८ अध्यायः ॥
(अनिष्टम् । वधः । इति रामानुजः ॥ यथा, रामायणे । २ । ८ । ३२ ।
“तस्मात् न लक्ष्मणे रामः पापं किञ्चित् करिष्यति ।
रामस्तु भरते पापं कुर्य्यादेव न संशयः ॥”
तद्वति, त्रि । इत्यमरः ॥ यथा, महाभारते । १ । ६० । १६ ।
“पुण्यां योनिं पुण्यकृतो व्रजन्ति
पापां योनिं पापकृतो व्रजन्ति ।
कीटाः पतङ्गाश्च भवन्ति पापा
न मे विवक्षास्ति महानुभाव ! ॥”)

पापकं, क्ली, (पापमेव । स्वार्थे कन् ।) पापम् । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । ७४ । २७ ।
“मन्यते पापकं कृत्वा न कश्चिद्वेत्ति मामिति ।
विदन्ति चैनं देवाश्च यश्चैवान्तरपूरुषः ॥”
पापेन कायतीति । कै + कः । पापवति, त्रि । यथा, महाभारते । १ । ७४ । २६ ।
“एकोऽहमस्मीति च मन्यसे त्वं
न हृच्छयं वेत्सि मुनिं पुराणम् ।
यो वेदिता कर्म्मणः पापकस्य
यस्यान्तिके त्वं वृजिनं करोषि ॥”)

पापकृत्, त्रि, (पापं कृतवानिति । पाप + कृ + “सुकर्म्मपापमन्त्रपुण्येषु कृञः ।” ३ । २ । ८६ । इति क्विप् ।) पापकर्त्ता । यथा,—
“ख्यापनेनानुतापेन तपसाध्ययनेन च ।
पापकृन्मुच्यते पापाद्दानेन च दमेन च ॥”
इति प्रायश्चित्ततत्त्वम् ॥
(यथा च महाभारते । १ । ६० । १६ ।
“पुण्यां योनिं पुण्यकृतो व्रजन्ति
पापां योनिं पापकृतो व्रजन्ति ॥”)

पापग्रहः, पुं, (पापोऽशुभकारी ग्रहः ।) अक्षीणचन्द्रः । कुजः । राहुः । शनिः । एतैर्युक्तो बुधः । रविः । यथा, ज्योतिःसारसंग्रहे ।
“अक्षीणेन्दुः कुजो राहुः शनिस्तैर्युत इन्दुजः ।
रविः पापा भवन्त्येते शुभाश्चान्ये प्रकीर्त्तिताः ॥”

पापघ्नः, पुं, (पापं हन्तीति । पाप + हन + “अमनुष्यकर्त्तृके च ।” ३ । २ । ५३ । इति टक् ।) तिलः । इति राजनिर्घण्टः ॥ पापनाशके, त्रि इति मुग्धबोधव्याकरणम् ॥

पापचेलिका, स्त्री, (पापमशुभं चेलति गच्छतीति । चेल + ण्वुल् + टाप् । कापि अत इत्वञ्च ।) पाठा । इति रत्नमाला ॥ आकनादि इति भाषा ॥

पापचेली, स्त्री, (पापं चेलतीति । चेल + अच् + गौरादित्वात् ङीष् ।) पाठा । इत्यमरः । २।४।८५ ॥

पापनापितः, पुं, (पापो नापितः ।) धूर्त्तनापितः । इति संक्षिप्तसारव्याकरणम् ॥